एकदन्तं चतुर्हस्तं पाशमङ्कुश धारिणम् ।
अभयं वरदं हस्तैः बिभ्राणं मूषकध्वजम् ॥
रक्तं लंबोदरं शूर्प कर्णकं रक्त वाससम् ।
रक्त गन्धानुलिप्ताङ्गं रक्त पुष्पैस्सुपूजितम् ॥
भक्तानुकंपिनं देवं जगत्कारण मच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये
नमस्ते अस्तु लंबोदराय एकदन्ताय विघ्न विनाशिने
शिव सुताय श्री वरद मूर्तये नमो नमः।

एतदथर्व शिरो योधीते – स ब्रह्म भूयाय कल्पते ।
स सर्वतः सुखमेधते । स सर्व विघ्नै र्नबाध्यते ।
स पञ्च महापातकोप पातकात्प्रमुच्यते ।
सायमधीयानो दिवस कृतं पापं नाशयति ।

प्रातरधीयानो रात्रि कृतं पापं नाशयति ।
सायं प्रातः प्रयुञ्जानोऽपापो भवति ।
धर्माऽर्थ काम्य मोक्षं च विन्दति ।
इदमथर्वशीर्ष मशिष्यायनदेयत् ।

यो यदि मोहाद्दास्यति – स पापीयान् भवति ।
सहस्रावर्तनाद्यं यं काममधीते – तं तं अनेन साधयेत् ।
अनेन गणपतिमभिषिञ्चति – स वाग्मी भवति ।

चतुर्थ्यामनस्नं जपति – स विद्यावान् भवति ।
इत्यथर्वण वाक्यं । ब्रह्माद्या चरणं विद्यात् ।
न बिभेति कदाचनेति ।
यो दूर्वाङ्कुरै र्यजति – स वैश्रवणोपमो भवति ।
यो लाजैर्यजति – स यशोवान् भवति , स मेधावान् भवति ।
यो मोदक सहस्रेण यजति – स वाञ्छित फलमवाप्नोति ।

यस्साज्य समिद्भि र्यजति – स सर्वं लभते, स सर्वं लभते ।
अष्टौ ब्राह्मणान् सम्यक्ग्राहयित्वा सूर्य वर्चस्वी भवति ।
सूर्य ग्रहणे महानद्यां प्रतिमा सन्निधौ वा
जप्त्वा सिद्ध मन्त्रो भवति ।

महा विघ्नात् प्रमुच्यते ।
महा दोषात् प्रमुच्यते ।
महा पापात् प्रमुच्यते ।
स सर्वविद्भवति । स सर्वविद्भवति ।
य एवं वेद । इत्युपनिषत् ।

ओं भद्रं कर्णेभिश्श्रुणुयाम देवाः । भद्रं पश्येमाऽक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः । व्यशेमदेवहितं यदायुः ।
स्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्तिनःपूषा विश्ववेदाः ।
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्तिनो बृहस्पतिर्दधातु ।

**ओं शान्तिश्शान्तिश्शान्तिः ।**

# श्री गणपति अथर्वशीर्षोपनिषत्

ओं भद्रं कर्णेभिश्श्रुणुयाम देवाः । भद्रं पश्येमाऽक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः । व्यशेमदेवहितं यदायुः ।
स्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्तिनःपूषा विश्ववेदाः ।
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्तिनो बृहस्पतिर्दधातु ।
ओं शान्तिश्शान्तिश्शान्तिः ।

ओं लं नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्वमसि ।
त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ।
त्वमेव केवलं हर्तासि ।
त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यं ।
ऋतं वच्मि । सत्यं वच्मि । अव त्वं मां । अव वक्तारं ।

अव श्रोतारं । अव दातारं । अव धातारं ।
अवानूचानामव शिष्यं । अवपुरस्तात् । अवदक्षिणात्तात् ।
अवपश्चात्तात् । अवोत्तरात्तात् । अवचोर्ध्वात्तात् । अवाधरात्तात् ।
सर्वतो मां पाहि पाहि समन्तात् ।

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः।
त्वं सच्चिदानन्दाद्वितीयोसि । त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोसि । सर्वं जगदिदं त्वत्तो जायते ।
सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयिलयमेष्यति ।

सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापो नलोनिलो नभः ।
त्वं चत्वारि वाक्परिमिता पदानि । त्वं गुण त्रयातीतः ।
त्वं कालत्रयातीतः । त्वं देहत्रयातीतः।

त्वं मूलाधारेस्थितोसि नित्यं । त्वं शक्तित्रयात्मकः ।
त्वां योगिनोध्यायन्ति नित्यं ।
त्वं ब्रह्मा त्वं विष्णु स्त्वं रुद्रस्त्वं इन्द्रस्त्वं अग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवस्सुवरों ।

गणादिं पूवमुच्चार्य वर्णादीन् तदनन्तरम् ।
अनुस्वारः परतरः अर्धेन्दु लसितं तथा ।

तारेण रुद्धं । एतत्तव मनुस्वरूपं । गकारः पूर्व रूपं ।
अकारो मध्यम रूपं । अनुस्वारश्चान्त्य रूपं ।
बिन्दु रुत्तर रूपं । नादस्सन्धानं । सँहितासन्धिः । सैषागणेश
विद्या । गणक ऋषिः । निचृद्गायत्री चन्दः ।
श्री महागणपतिर्देवता ।

**ओं गं गणपतये नमः ।**

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ।